[1]तक्षकः, [2]तक्षा.

(693) " तगि गत्यर्थः " (I-भ्वादिः-149. सक. सेट्. पर.)

'तगिः स्खलने रूढः । तङ्गति ।' इति क्षीरस्वामी ।

तङ्गकः-ङ्गिका, तङ्गकः-ङ्गिका, तितङ्गिषकः-षिका, तातङ्गकः-ङ्गिका ; [A]तङ्गितम्, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत (163) ज्ञेयानि ।

(694) " तट उच्छ्राये " (I-भ्वादिः-308. अक. सेट्. पर.)

'नगाद्यारोह उच्छ्रायः—' इत्यमरः ।

ताटकः-टिका, ताटकः-टिका, तितटिषकः-षिका, तातटकः-टिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककठतिवत् (148) ज्ञेयानि । तटः-[3]तटी, इति विशेषः ।

(695) " तड आघाते " (X-चुरादिः-1579. सक. सेट्. उभ.)

'शोभार्थश्च द्रुमे ।' इति धा. का. व्याख्याने (3-18) ।

ताडकः-डिका, तिताडयिषकः-षिका, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगालयतिवत् (388) ज्ञेयानि । अस्य धातोरुभयपदित्वात् ताडयन्-न्ती, तिताडयिषन्-न्ती, ताडयिष्यन्-न्ती-ती, तिताडयिषिष्यन्-न्ती-ती, इति रूपाण्यधिकानीति विशेषः । [B]सन्ताडनम् । सन्ताडितः । [4]तण्डुलः ।

---

1. 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' [द. उ. 3.5] इति क्वुनप्रत्ययः । तस्याकादेशः । तक्षकः = सर्पविशेषः ।
2. 'कनिन् युवृषितक्षि—' [द. उ. 6.51] इति कनिन्प्रत्ययः । तक्ष्णोति, तक्षति इति वा तक्षा = शिल्पी ।
3. पचाद्यजन्तात् स्त्रियां गौरादिपाठात् ङीष् ।
4. औणादिके [द. उ. 10-17] उलप्रत्यये नुमागमः, ह्रस्वश्च निपात्यते । तण्डुलः = व्रीहिसारः । ताड्यते इति तण्डुलः । संज्ञाशब्देषु केवलं व्युत्पत्तिमात्रं प्रदर्श्यते । नावयवार्थेऽभिनिवेशः कार्यः ।

A. 'विलङ्घ्य देशं शबराङ्गनाजनप्रवञ्चितं मङ्गलधेनुतङ्गितम् ॥' धा. का. 1.20.

B. 'छन्दन् शुचं वरमशिश्रिणदाश्रितानां सन्ताडनैर्वृषभदैत्यमखाडयच्च ॥' धा. का. 3. 18.